# .. hanumadaShTottarashatanAmAvaliH 5 ..

# ॥ હનુમદષ્ટોત્તરશતનામાવલિઃ ૫ ॥

## Document Information


```
Text title : hanumadaShTottarashatanAmAvaliH 5
File name : hanumadaShTottarashatanAmAvaliH5.itx
Category : aShTottarashatanAmAvalI
Location : doc_hanumaana
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Shri Devi Kumar, refined by PSA Easwaran
Proofread by : PSA Easwaran psaeaswaran at gmail
Description-comments : From Hanumatstutimanjari, Mahaperiaval
Publication
Acknowledge-Permission: Mahaperiyaval Trust
Latest update : April 24, 2016
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org
```



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.


August 2, 2016

*sanskritdocuments.org*

# ॥ હનુમદષ્ટોત્તરશતનામાવલિઃ ૫ ॥

(રામનામાઙ્કિતા)

ૐ રામદૂતાય નમઃ । રામભૃત્યાય । રામચિત્તાપહારકાય ।
રામનામજપાસક્તાય । રામકીર્તિપ્રચારકાય । રામાલિઙ્ગનસૌખ્યજ્ઞાય ।
રામવિક્રમહર્ષિતાય । રામબાણપ્રભાવજ્ઞાય । રામસેવાધુરન્ધરાય ।
રામહૃત્પદ્મમાર્તાણ્ડાય । રામસઙ્કલ્પપૂરકાય । રામામોદિતવાગ્વૃત્તયે ।
રામસન્દેશવાહકાય । રામતારકગુહ્યજ્ઞાય । રામાહ્લાદનપણ્ડિતાય ।
રામભૂપાલસચિવાય । રામધર્મપ્રવર્તકાય । રામાનુજપ્રાણદાત્રે ।
રામભક્તિલતાસુમાય । રામચન્દ્રજયાશંસિને નમઃ । ૨૦
ૐ રામધૈર્યપ્રવર્ધકાય નમઃ । રામપ્રભાવતત્ત્વજ્ઞાય ।
રામપૂજનતત્પરાય । રામમાન્યાય । રામહૃદ્યાય । રામકૃત્યપરાયણાય ।
રામસૌલભ્યસંવેત્ત્રે । રામાનુગ્રહસાધકાય ।
રામાર્પિતવચશ્ચિત્તદેહવૃત્તિપ્રવર્તિતાય । રામસામુદ્રિકાભિજ્ઞાય ।
રામપાદાબ્જષટ્પદાય । રામાયણમહામાલામધ્યાશ્રિતમહામણયે ।
રામાયણરસાસ્વાદસ્રવદશ્રુપરિપ્લુતાય ।
રામકોદણ્ડટઙ્કારસહકારિમહાસ્વનાય ।
રામસાયૂજ્યસામ્રાજ્યદ્વારોદ્ઘાટનકર્મકૃતે ।
રામપાદાબ્જનિષ્યન્દિમધુમાધુર્યલોલુપાય ।
રામકૈઙ્કર્યમાત્રૈકપુરુષાર્થકૃતાદરાય ।
રામાયણમહામ્ભોધિમથનોત્થસુધાઘટાય ।
રામાખ્યકામધુગ્દોગ્ધ્રે । રામવક્ત્રેન્દુસાગરાય નમઃ । ૪૦
ૐ રામચન્દ્રકરસ્પર્શદ્રવચ્છીતકરોપલાય નમઃ ।
રામાયણમહાકાવ્યશુક્તિનિક્ષિપ્તમૌક્તિકાય ।
રામાયણમહારણ્યવિહારરતકેસરિણે ।
રામપત્ન્યેકપત્નીત્વસપત્નાયિતભક્તિમતે ।
રામેઙ્ગિતરહસ્યજ્ઞાય । રામમન્ત્રપ્રયોગવિદે ।
રામવિક્રમવર્ષર્તુપૂર્વભૂનીલનીરદાય ।
રામકારુણ્યમાર્તણ્ડપ્રાગુદ્યદરુણાયિતાય ।
રામરાજ્યાભિષેકામ્બુપવિત્રીકૃતમસ્તકાય ।
રામવિશ્લેષદાવાગ્નિશમનોદ્યતનીરદાય ।
રામાયણવિયદ્ગઙ્ગાકલ્લોલાયિતકીર્તિમતે ।
રામપ્રપન્નવાત્સલ્યવ્રતતાત્પર્યકોવિદાય ।
રામાખ્યાનસમાશ્વસ્તસીતામાનસસંશયાય ।
રામસુગ્રીવમૈત્ર્યાખ્યહવ્યવાહેન્ધનાયિતાય ।

રામાઙ્ગુલીયમાહાત્મ્યસમેધિતપરાક્રમાય ।
રામાર્તિધ્વંસનચણચૂડામણિલસત્કરાય ।
રામનામમધુસ્યન્દદ્વદનામ્બુજશોભિતાય ।
રામનામપ્રભાવેણ ગોષ્પદીકૃતવારિધયે ।
રામૌદાર્યપ્રદીપાર્ચિર્વર્ધકસ્નેહવિગ્રહાય ।
રામશ્રીમુખજીમૂતવર્ષણોન્મુખચાતકાય નમઃ । ૬૦
ॐ રામભક્ત્યેકસુલભબ્રહ્મચર્યવ્રતે સ્થિતાય નમઃ ।
રામલક્ષ્મણસંવાહકૃતાર્થીકૃતદોર્યુગાય ।
રામલક્ષ્મણસીતાખ્યત્રયીરાજિતહૃદ્ગુહાય ।
રામરાવણસઙ્ગ્રામવીક્ષણોત્ફુલ્લવિગ્રહાય ।
રામાનુજેન્દ્રજિદ્યુદ્ધલબ્ધવ્રણકિણાઙ્કિતાય ।
રામબ્રહ્માનુસન્ધાનવિધિદીક્ષાપ્રદાયકાય ।
રામરાવણસઙ્ગ્રામમહાધ્વરવિધાનકૃતે ।
રામનામમહારત્નનિક્ષેપમણિપેટકાય ।
રામતારાધિપજ્યોત્સ્નાપાનોન્મત્તચકોરકાય ।
રામાયણાખ્યસૌવર્ણપઞ્જરસ્થિતશારિકાય ।
રામવૃત્તાન્તવિધ્વસ્તસીતાહૃદયશલ્યકાય ।
રામસન્દેશવર્ષામ્બુવહ્ન્નીલપયોધરાય ।
રામરાકાહિમકરજ્યોત્સ્નાધવલવિગ્રહાય ।
રામસેવામહાયજ્ઞદીક્ષિતાય । રામજીવનાય ।
રામપ્રાણાય । રામવિત્તાય । રામાયત્તકલેવરાય ।
રામશોકાશોકવનભઞ્જનોદ્યત્પ્રભઞ્જનાય ।
રામપ્રીતિવસન્તર્તુસૂચકાયિતકોકિલાય નમઃ । ૮૦
ॐ રામકાર્યાર્થોપરોધદ્દૂરોત્સારણલમ્પટાય નમઃ ।
રામાયણસરોજસ્થહંસાય । રામહિતે રતાય ।
રામાનુજક્રોધવહ્નિદગ્ધસુગ્રીવરક્ષકાય ।
રામસૌહાર્દકલ્પદ્રુસુમોદ્ગમનદોહદાય । રામેષુગતિસંવેત્ત્રે ।
રામજૈત્રરથધ્વજાય । રામબ્રહ્મનિદિધ્યાસનિરતાય । રામવલ્લભાય ।
રામસીતાખ્યયુગલયોજકાય । રામમાનિતાય । રામસેનાગ્રણ્યે ।
રામકીર્તિઘોષણડિણ્ડમાય । રામેતિદ્વ્યક્ષરાકારકવચાવૃતવિગ્રહાય ।
રામાયણમહાવૃક્ષફલાસક્તકપીશ્વરાય ।
રામપાદાશ્રયાન્વેષિવિભીષણવિચારવિદે ।
રામમાહાત્મ્યસર્વસ્વાય । રામસદ્ગુણગાયકાય ।
રામજાયાવિષાદાગ્નિનિર્દગ્ધરિપુસૈનિકાય ।
રામકલ્પદ્રુમૂલસ્થાય નમઃ । ૧૦૦

ॐ રામજીમૂતવૈદ્યુતાય નમઃ । રામન્યસ્તસમસ્તાશાય ।
રામવિશ્વાસભાજનાય । રામપ્રભાવરચિતશૈત્યવાલાગ્નિશોભિતાય ।
રામભદ્રાશ્રયોપાત્તધીરોદાત્તગુણાકરાય ।
રામદક્ષિણહસ્તાબ્જમુકુટોદ્ભાસિમસ્તકાય ।
રામશ્રીવદનોદ્ભાસિસ્મિતોત્પુલકમૂર્તિમતે ।
રામબ્રહ્માનુભૂત્યાપ્તપૂર્ણાનન્દનિમજ્જિતાય નમઃ । ૧૦૮

---

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

.. hanumadaShTottarashatanAmAvaliH 5 ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*